# सागरिका

द्वात्रिंशवर्षे चतुर्थाङ्कः

३२. ४

विक्रमसंवत् २०५२

प्रकाशिका

सागरिका–समितिः

महामनापुरी

वाराणसी ५

( B. H. U. )

(19)

# विशिष्टाद्वैतवादिनां सत्ख्यातिवादः

मुरली मनोहरः पाठकः

ख्यातिर्ज्ञानम्[1]। सती चासौ ख्यातिः सत्ख्यातिः। समेषु खलु भारतीयदर्शनप्रस्थानेषु भ्रमो विविधख्यातिरूपेण व्याख्यातः। विख्याताः ख्यातयश्च आत्मख्यातिरित्यादयः[2] पञ्चैव सन्ति।

एताः पञ्चख्यातीरतिरिच्य कैश्चिदन्यैरप्याचार्यैः स्वमतानुसारिण्यः ख्यातयो निर्दिष्टाः। सत्ख्यातिर्ह्येषा तास्वेकतमा, श्रीमद्रामानुजाचार्येण विशिष्टाद्वैतसिद्धान्तसंस्थापकेन अङ्गीकृता।

अद्वैतवेदान्तिनां मतेन ज्ञानं सविषयकमेवोत्पद्यते, तच्च प्रातिभासिक-व्यावहारिक-पारमार्थिकभेदेन त्रिधा। शुक्तिरजतस्थलादिषूत्पद्यमानं ज्ञानं प्रातिभासिकम्, घटादिविषयकं ज्ञानं व्यावहारिकं ब्रह्मज्ञानं च पारमार्थिकम्। अद्वैतिनो व्यावहारिकज्ञानस्यापि प्रातिभासिकवदेव मिथ्यात्वं स्वीकुर्वन्ति एतयोर्ब्रह्मव्यतिरिक्तविषयत्वात्। विशिष्टाद्वैतवादिनां मतेन इदं भेदत्रयं नेष्टम्। ते ज्ञानस्य भेदमिमं स्वीकुर्वन्त्यपि प्रत्येकं ज्ञानस्य सविषयत्वं मन्वते। अपि च ते समेषां ज्ञानानां याथार्थ्यं स्वीकुर्वन्ति। इदमेव वेदविदामपि मन्तव्यमस्ति, यथाहुः श्रीरामानुजाचार्यपादा ब्रह्मसूत्रभाष्यप्रसङ्गे कारिकामुखेन—

यथार्थं सर्वविज्ञानमिति वेदविदां मतम्।
श्रुतिस्मृतिभ्यः सर्वस्य सर्वात्मत्वप्रतीतितः ॥[3]

सत्ख्यातौ ज्ञानविषयस्य सर्वत्र सत्यत्वं स्वीक्रियते[4]। एवं सति शुक्तिकादौ रजतादेर्भ्रमज्ञानमपि सत्यं स्यात्। भ्रमस्योपपादनं श्रीनिवासाचार्येण तदीययतीन्द्रमतदीपिकायां साधु विहितम्। तन्मतेन[5] पञ्चीकरणप्रक्रियाद्वारेण[6] पृथिव्यादि पञ्चभूतेषु प्रत्येकमितरेष्वपि भूतेषु विद्यते। अतः शुक्तिकायामपि रजतांशस्य सत्त्वात् तत्र यद् रजतविषयकं ज्ञानमुत्पद्यते, तदपि यथार्थमेव। रजतांशस्य न्यूनत्वाद् व्यवहारस्य बाधे सति भ्रमस्थितिर्जायते। तत्र नेत्रदोषवशात् शुक्त्यंशरहिते रजतांशे रजतार्थी पुरुषः प्रवर्तते। दोषे नष्टे सति यदा शुक्त्यंशस्य

ज्ञानं भवति, तदा निवर्तते । शुक्त्यंशस्याधिक्यज्ञानेन बाध्यबाधकभावस्यापि समाधानं भवति । तत्र शुक्तेः साकल्यग्रहणेन रजतस्य बाधो, वैकल्येन च न । अतः शुक्तिकादिषु रजतस्य ज्ञानं सदेव । एतदेव श्रीरामानुजाचार्येण श्रीभाष्ये सम्यगुपपादितम्[७] । अत्र स्वप्नज्ञानमपि सत्यमेव[८] । तस्य सृष्टिर्हि तत्तज्जीवानां कर्मानुसारिणी ईश्वरकृता च । स्वप्नादेरीश्वरकर्तृत्वं प्रतिपादयन्ती बृहदारण्यकोपनिषदेवं निगदति—"न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान् रथयोगान् पथः सृजते । न तत्रानन्दामुदः प्रमुदो भवन्ति अथानन्दान् मुदः प्रमुदः सृजते । न तत्र वेशान्तान् पुष्करिण्यः स्रवन्त्यः सृजते । स हि कर्त्ता ।"[९]

अनया श्रुत्या स्वप्नगतविषयाणामपि जाग्रद्वदेव सत्यत्वं सिद्धम् । अतः स्वप्नगतसुखदुःखादयः स्वप्न एव सत्यत्वेनानुभूयन्ते ।

पीतशङ्खादिस्थलेषु द्रष्टुर्नयनयोर्विद्यमानपित्तद्रव्यसंयुक्ता नयनरश्मयः शङ्खादिभिः संयुज्यन्ते । अतः पित्तगतपीतिम्नाऽभिभूतत्वात् शङ्खगतशुक्लिम्नो ग्रहणं न भवति, शुक्लश्च शङ्खः सुवर्णवेष्टितशङ्खवत् पीतो दृश्यते । कामलारोगग्रस्तजनस्य नयनयोर्निष्क्रान्तः पीतिमा अल्पो भवति, अतः तस्य ग्रहणं वैयक्तिकं न तु सार्वजनीनम् ।"[१०] एवं शङ्खस्य पीतत्वमपि यथार्थमेव ।

अनेनैवप्रकारेण जपाकुसुमस्य पार्श्ववर्त्ती स्फटिकमणिरपि रक्तत्वेन गृह्यते । तस्य रक्तिमाऽपि सत्य एव ।"[११]

मरीचिकायामपि प्रतीयमानं जलं यथार्थम्, पञ्चीकरणप्रक्रियया सूर्यरश्मिष्वपि जलांशस्य विद्यमानत्वात् ।"[१२]

दिग्भ्रमज्ञानमपि यथार्थमेव । सर्वासु दिक्षु सर्वा दिशो विद्यमाना भवन्ति । दिशामवच्छेदकं तु दिक्त्वमेव । तदतिरिक्तं नास्ति किमपि दिङ्नाम द्रव्यान्तरम् ।"[१३]

अलातचक्रस्य ज्ञानेऽपि शीघ्रतावशादन्तरालं न गृह्यत अतस्तत्तद्देशसंयुक्तस्य तत्तद्वस्तुनः चक्राकारेण ग्रहणमपि यथार्थमेव ।"[१४]

दर्पणादिषु निजमुखादेः प्रतीतौ, नयनरश्मयो दर्पणादेः परावृत्य मुखादिकं गृह्णन्ति । तत्र रश्मिगतिशीघ्रतया दर्पणमुखयोरन्तरालग्रहणाभावात् तत्र मुखप्रतीतिरपि यथार्थैव ।"[१५]



द्विचन्द्रज्ञाने, नयनस्याङ्गुल्यवष्टम्भेनोत्पन्नतिमिरेण नेत्रतेजोगतिर्द्विधा विभज्यते । तत्र ज्योतिर्द्वयेन ग्राहकसामग्रीभेदात् चन्द्रद्वयस्य निरपेक्षं ज्ञानं जायते । अतो द्विचन्द्रज्ञानमपि यथार्थमेव"[१६] ।

इत्थं च 'सर्वं विज्ञानं सत्यं सविशेषविषयञ्च, निर्विशेषवस्तुनोऽग्रहणात्' इति सिद्धान्तोऽयं श्रीनिवासाचार्येण विशदीकृतः ।

ननु नीवारेण व्रीह्यादिजन्यकार्यसिद्धत्वात् श्रुतौ तादृशी व्यवस्था वर्तते, कार्यकारित्वाभावे तु सर्वत्र सर्वस्य अस्तित्वस्वीकरणमव्यवस्थेति शङ्कायां मेघनादसूरिमतेन उच्यते । शुक्तौ रजतांशस्याल्पतया आभूषणानि नैव निर्मातुं शक्यन्ते, तत्रेन्द्रियादिदोषवशाद् रजताकारा प्रतीतिः भवति सा चाल्पतया व्यावहारिककार्यकारित्वशून्यत्वेन बाध्यते । यथा खलु नीवारादौ व्रीह्यंशभूयस्त्वेन कार्यकारित्वं जायते, तथैव यत्र कार्यकारित्वं भवेत् तत्र व्यवहारोऽपि प्रचलिष्यत्येव । सादृश्यं तु येनावयवसाम्येन निर्मीयते तद् गवयेन गोकार्यमिव सर्वत्र कार्यकारित्वेन कथयितुं न शक्यते ।"[१७]

संशयानध्यवसायस्थलेष्वपि यथार्थख्यातिरेव भवति । स्थाणुपुरुषयोः परस्परं तात्त्विकरूपेण साम्यं भवति, यत्खलु इन्द्रियादिदोषवशात् पुरुषांशं च प्रबोधयति । उभयोर्निर्माणे भौतिकयाथार्थ्यस्य निषेधो नैव कर्तुं शक्यते, केवलं व्यावहारिको भेद एव बाधस्य हेतुः ।"[१८]

अत्र विविच्यते । सुदर्शनसूरिमतेन यथार्थख्यातिवादो, बोधायननाथमुनि-राममिश्रादिपूर्वाचार्याणामेव मन्तव्यम्, रामानुजाचार्यस्य तु काचिदन्यैव ख्यातिरिष्ट[१९] तन्मतेन मिथ्यात्वमेकस्य वस्तुनो भ्रमवशादन्यस्मिन् प्रतीतिः[२०] । श्रुतिप्रकाशिकायामप्येवमुक्तम्—

'यथार्थख्यातिव्यतिरिक्तपक्षेषु अन्यथाख्यातिपक्षः प्रबलः ।'[२१] विपरीतख्यातिवादे ज्ञानस्य बाधोऽङ्गीकृतः यथार्थख्यातिवादे ज्ञानस्य याथार्थ्यं स्वीकृत्य व्यवहारमेव केवलं बाधयोग्यं स्थापयति ।[२२]

प्रभाकरमतेऽपि सर्वं ज्ञानं यथार्थमेव । यथाऽऽह शालिकनाथमिश्रः—'यथार्थं सर्वमेव ज्ञानम् ।'[२३] तेन अख्यातिवादयथार्थख्यातिवादयोरपि परस्परं सामञ्जस्यं प्रतीयते । प्रभाकरमतेन शुक्तौ प्रतीयमानं रजतं रजतस्यैव न तु शुक्तेः, शुक्तौ रजतज्ञाने सति मिथ्याज्ञान-

प्रसङ्गभयात् । तत्र तु पुरोवर्त्ति इदमाकारक रजतत्वस्य च योगः तथा च इदन्त्वस्य प्रत्यक्षं भवति न तु शुक्त्यंशस्य । रामानुजमतेऽपि, इन्द्रियदोषवशाच्छुक्तिभूयस्त्वस्याग्रहणं रजताल्पत्वस्य च ग्रहणं भवति उभयत्रापि शुक्तः परोक्षत्वमेव जायते । मेघनादसूरिमतेन[२३] यथार्थ-ख्यातिवादे रजतादिस्मृतिः ख्यातिकारणत्वेन स्वीक्रियते, किन्तु तस्याः कार्यरूपायां ख्यातौ समावेशं विधाय प्रभाकरस्याख्यातिवादो न स्वीक्रियते । प्राभाकरा व्यवहारवैपरीत्यं पुरोवर्तिशुक्तेः स्मृतिस्थ-रजतस्य च भेदाग्रहणेन मन्वते ज्ञानस्य च स्मृतिरूपे प्रत्यक्षरूपे वा सत्यत्वं स्वीकुर्वते । रामानुजमतेन तु शुक्तौ रजतप्रतीतिकारण, तत्र रजतांशस्यैव वास्तविकं प्रत्यक्षमिन्द्रियादिदोषेण, भेदसूचकानामभावश्च । इत्थमुभयोः सम्बन्धो ज्ञानस्य याथार्थ्यमधिकृत्यैव वर्तते ।

विवेचनेनानेन, अन्यथाख्यातिसत्ख्यातिवादयोः, अख्यातिसत्ख्यातिवादयोश्च परस्परमीषत्साम्यञ्जस्यं प्रतीयते । तथापि सत्ख्यातिवादोऽख्यातिवादस्य सामीप्यं भजतीति शम् ।

## आनुषङ्गिकप्रकरणानि

१. न्यायकोशः, पृष्ठाङ्कः २५५
२. आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
तथाऽनिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम् ॥
यतीन्द्रमतदीपिकाया भावप्रकाशटीकायामुद्धरणम्, पृ० २५
३. ब्रह्मसूत्रम्, भाष्यम्, पृ० १४३
४. सत्ख्यातिर्नाम ज्ञानविषयस्य सत्यत्वम् । तर्हि भ्रमत्वं कथमिति चेत्, विषयव्यवहारबाधाद् भ्रमत्वम् । यतीन्द्रमतदीपिका, पृ० २३
५. तत्रैव, पृ० २३
६. द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते ॥ वेदान्तसारः पृ० १५३
७. (क) दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते ।
अतो यथार्थरूप्यादि-विज्ञानं शुक्तिकादिषु ॥
ब्रह्मसूत्रम्, भाष्यम्, पृ० १४४
(ख) बाध्यबाधकभावोऽपि भूयस्त्वेनोपपद्यते ।
शुक्तिभूयस्त्व-वैकल्य-साकल्यग्रहरूपतः ॥ तत्रैव पृ० १४५



८. स्वप्नादिज्ञानं तु सत्यमेव । तत्तत्पुरुषानुभाव्यतया तत्तत्कालावसानान् रथादीन् परमपुरुषः सृजतीति हि श्रुत्या गम्यते ।
यतीन्द्रमतदीपिका पृ० २३
९. बृहदारण्यकोपनिषद्, ६–३–१०
१०. पीतशङ्ख इत्यादौ नयनवर्त्तिपित्तद्रव्यसम्भिन्ना नायनरश्मयश्शङ्खादिभिस्संयुज्यन्ते । तत्र पित्तगतपीतिमाभिभूतः शङ्खगतशुक्लिमा न गृह्यते । अतस्सुवर्णानुलिप्तशङ्खवत्पीतश्शङ्ख इति प्रतीयते । सूक्ष्मत्वात्पीतिमा स्वनयनतिरस्क्रान्ततया स्वेनैव गृह्यते । न त्वन्यैः ।
यतीन्द्रमतदीपिका, पृ० २३–२४
११. १२, १४, १६ । तत्रैव, पृ० २४
१३. दिग्भ्रमोऽपि तत्रैव दिशि दिगन्तरस्य विद्यमानत्वात्, अवच्छेदकमन्तरेण दिगिति द्रव्यान्तरानङ्गीकाराच्च । तत्रैव पृ० २४
१५. दर्पणादिषु निजमुखादिप्रतीतिरपि यथार्था । दर्पणादिप्रतिहतगतयो नायनरश्मयो दर्पणादिग्रहणपूर्वकं निजमुखादि गृह्णन्ति तत्राप्यतिशीघ्र्यादन्तरालाग्रहणात्तथा प्रतीतिः । तत्रैव, पृ० २४
१७. नयद्युमणिः, पृ० १५३ २४ ।
१८. तत्रैव, पृ० १६३–१६५
१९. श्रुतिप्रकाशिका, पृ० १८३
२०. ख्यात्यन्तराणां तु सुदूरमपि गत्वा अन्यथावभास आश्रयणीयः । रामानुजभाष्यम् ( भारतीयदर्शनेतिहासस्य श्री सुरेन्द्रनाथदासगुप्तप्रणीतस्य तृतीयभागस्य १६७ तमे पृष्ठाङ्के उद्धृतम् ।
२१. तत्रैव, पृ० १६६
२२. नयद्युमणिः, पृ० १५४
२३. प्रकरणपञ्चिका, पृ० ३२

संस्कृताध्ययन शाला
उज्जयिनी विश्वविद्यालय

# समाज धर्म एवं दर्शन

वर्ष १५, अंक १
चैत्र – ज्येष्ठ, सम्वत् २०५४
अप्रैल – जून १९९७

श्री भुवनेश्वरी विद्या-प्रतिष्ठान का त्रैमासिक